# Rishibhih Kritam Narmada Stotram

# ઋષિભિઃ કૃતં નર્મદાસ્તોત્રમ્

## Document Information

Text title : Rishibhih Kritam Narmada Stotram

File name : RRiShibhiHkRRitaMnarmadAstotram.itx

Category : devii, devI, nadI, skandapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : skandapurANa | AvantyakhaNDa | revAkhaNDa | adhyAya 12/2-18||

Latest update : June 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 24, 2025

*sanskritdocuments.org*

# ઋષિભિઃ કૃતં નર્મદાસ્તોત્રમ્

શ્રીમાર્કણ્ડેય ઉવાચ ।
એતચ્છ્રુત્વા વચો રાજન્સંહૃષ્ટા ઋષયોઽભવન્ ।
નર્મદાં સ્તોતુમારબ્ધાઃ કૃતાઞ્જલિપુટા દ્વિજાઃ ॥ ૧॥

નમોઽસ્તુ તે પુણ્યજલે નમો મકરગામિનિ ।
નમસ્તે પાપમોચિન્યૈ નમો દેવિ વરાનને ॥ ૨॥

નમોઽસ્તુ તે પુણ્યજલાશ્રયે શુભે
વિશુદ્ધસત્ત્વં સુરસિદ્ધસેવિતે ।
નમોઽસ્તુ તે તીર્થગણૈર્નિષેવિતે
નમોઽસ્તુ રુદ્રાઙ્ગસમુદ્ભવે વરે ॥ ૩॥

નમોઽસ્તુ તે દેવિ સમુદ્રગામિનિ
નમોઽસ્તુ તે દેવિ વરપ્રદે શિવે ।
નમોઽસ્તુ લોકદ્વયસૌખ્યદાયિનિ
હ્યનેકભૂતૌઘસમાશ્રિતેઽનઘે ॥ ૪॥

સરિદ્વરે પાપહરે વિચિત્રિતે
ગન્ધર્વયક્ષોરગસેવિતાઙ્ગે ।
સનાતનિ પ્રાણિગણાનુકમ્પિનિ
મોક્ષપ્રદે દેવિ વિધેહિ શં નઃ ॥ ૫॥

મહાગજૌઘૈર્મહિષૈર્વરાહૈઃ સંસેવિતે દેવિ મહોર્મિમાલે ।
નતાઃ સ્મ સર્વે વરદે સુખપ્રદે વિમોચયાસ્માન્પશુપાશબન્ધાત્ ॥ ૬॥

પાપૈરનેકૈરશુભૈર્વિબદ્ધા ભ્રમન્તિ તાવન્નરકેષુ મર્ત્યાઃ ।
મહાનિલોદ્ભૂતતરઙ્ગભૂતં યાવત્તવામ્ભો હિ ન સંસ્પૃશન્તિ ॥ ૭॥

અનેકદુઃખૌઘભયાર્દિતાનાં પાપૈરનેકૈરભિવેષ્ટિતાનામ્ ।
ગતિસ્ત્વમમ્ભોજસમાનવક્ત્રે દ્વન્દ્વૈરનેકૈરપિ સંવૃતાનામ્ ॥ ૮॥

નદ્યશ્ચ પૂતા વિમલા ભવન્તિ ત્વાં દેવિ સમ્પ્રાપ્ય ન સંશયોઽત્ર ।
દુઃખાતુરાણામભયં દદાસિ શિષ્ટૈરનેકૈરભિપૂજિતાસિ ॥ ૯॥

સ્પૃષ્ટં કરૈશ્ચન્દ્રમસો રવેશ્ચ તદૈવ દદ્યાત્પરમં પદં તુ ।
યત્રોપલાઃ પુણ્યજલાપ્લુતાસ્તે શિવત્વમાયાન્તિ કિમત્ર ચિત્રમ્ ॥ ૧૦॥

ભ્રમન્તિ તાવન્નરકેષુ મર્ત્યા દુઃખાતુરાઃ પાપપરીતદેહાઃ ।
મહાનિલોદ્ભૂતતરઙ્ગભઙ્ગં યાવત્તવામ્ભો ન હિ સંશ્રયન્તિ ॥ ૧૧॥

મ્લેચ્છાઃ પુલિન્દાસ્ત્વથ યાતુધાનાઃ પિબન્તિ યેઽમ્ભસ્તવ દેવિ પુણ્યમ્ ।
મુક્તા ભવન્તીહ ભયાત્તુ ઘોરાન્નિઃસંશયં તેઽપિ કિમત્ર ચિત્રમ્ ॥ ૧૨॥

સરાંસિ નદ્યઃ ક્ષયમભ્યુપેતા ઘોરે યુગેઽસ્મિન્ હિ કલૌ પ્રદૂષિતે ।
ત્વં ભ્રાજસે દેવિ જલૌઘપૂર્ણા દિવીવ નક્ષત્રપથે ચ ગઙ્ગા ॥ ૧૩॥

તવ પ્રસાદાદ્વરદે વરિષ્ઠે કાલં યથેમં પરિપાલયિત્વા ।
યામોઽથ રુદ્રં તવ સુપ્રસાદાદ્વયં તથા ત્વં કુરુ વૈ પ્રસાદમ્ ॥ ૧૪॥

ગતિસ્ત્વમમ્બેવ પિતેવ પુત્રાંસ્ત્વં પાહિ નો યાવદિમં યુગાન્તમ્ ।
કાલં ત્વનાવૃષ્ટિહતં સુઘોરં યાવત્તરામસ્તવ સુપ્રસાદાત્ ॥ ૧૫॥

પઠન્તિ યે સ્તોત્રમિદં દ્વિજેન્દ્રાઃ શૃણ્વન્તિ યે ચાપિ નરાઃ પ્રશાન્તાઃ ।
તે યાન્તિ રુદ્રં વૃષસંયુતેન યાનેન દિવ્યામ્બરભૂષિતાશ્ચ ॥ ૧૬॥

યે સ્તોત્રમેતત્સતતં પઠન્તિ સ્નાત્વા તુ તોયે ખલુ નર્મદાયાઃ ।
અન્તે હિ તેષાં સરિદુત્તમેયં ગતિં વિશુદ્ધામચિરાદ્દદાતિ ॥ ૧૭॥

પ્રાતઃ સમુત્થાય તથા શયાનો યઃ કીર્તયેતાનુદિનં સ્તવં ચ ।
સ મુક્તપાપઃ સુવિશુદ્ધદેહઃ સમાશ્રયં યાતિ મહેશ્વરસ્ય ॥ ૧૮॥

ઇતિ શ્રીસ્કન્દપુરાણે આવન્ત્યખણ્ડે રેવાખણ્ડે
શ્રીનર્મદામાહાત્મ્યે નર્મદાસ્તોત્રકથનં નામ દ્વાદશોઽધ્યાયઃ ॥

સ્કન્દપુરાણ । આવન્ત્યખણ્ડ । રેવાખણ્ડ । અધ્યાય ૧૨/૨-૧૮॥

skandapurANa . AvantyakhaNDa . revAkhaNDa . adhyAya 12/2-18..

Proofread by PSA Easwaran

*Rishibhih Kritam Narmada Stotram*

pdf was typeset on June 24, 2025

Please send corrections to *sanskrit@cheerful.com*